# गोदाष्टोत्तरशतनामावलिः

godAShTottarashatanAmAvaliH

sanskritdocuments.org

June 22, 2019

godAShTottarashatanAmAvaliH

# गोदाष्टोत्तरशतनामावलिः

## Sanskrit Document Information

Text title : godAShTottarashatanAmAvaliH

File name : godAShTottarashatanAmAvaliH.itx

Category : devii, aShTottarashatanAmAvalI, nAmAvalI, nadI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : See corresponding stotram

Acknowledge-Permission: Pandit Shri Rama Ramanuja Acharya, srimatham.com

Latest update : June 22, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 22, 2019

*sanskritdocuments.org*

# गोदाष्टोत्तरशतनामावलिः

ॐ श्रीरङ्गनायक्यै नमः । गोदायै । विष्णुचित्तात्मजायै ।
सत्यै । गोपीवेषधरायै । देव्यै । भूसुतायै । भोगशालिन्यै ।
तुलसीवनसञ्जातायै । (तुलसीकाननोद्भुतायै) श्रीधन्विपुरवासिन्यै ।
श्रीभट्टनाथप्रियकर्यै । श्रीकृष्णहितभोगिन्यै । आमुक्तमाल्यदायै ।
बालायै । श्रीरङ्गनाथप्रियायै । परायै । विश्वम्भरायै । कलालापायै ।
यतिराजसहोदर्यै । श्रीकृष्णानुरक्तायै नमः ॥ २०॥

ॐ सुभगायै नमः । सुलभश्रियै । श्रीसुलक्षणायै ।
लक्ष्मीप्रियसख्यै । श्यामायै । दयाञ्चितदृगञ्चलायै ।
फाल्गुन्याविर्भवायै । रम्यायै । धनुर्मासकृतव्रतायै ।
चम्पकाशोकपुन्नागमालतीविलसत्कचायै । आकारत्रयसम्पन्नायै ।
नारायणपदाश्रितायै । श्रीमदष्टाक्षरमन्त्रराजस्थितमनोधरायै ।
(मनोरथायै) मोक्षप्रदाननिपुणायै । मनुराजाधिदेवतायै ।
(मनुरत्नाधिदेवतायै) ब्रह्माण्यै । लोकजनन्यै । लीलामानुषरूपिण्यै ।
ब्रह्मज्ञानप्रदायै । मायायै नमः ॥ ४०॥

ॐ सच्चिदानन्दविग्रहायै नमः । महापतिव्रतायै ।
विष्णुगुणकीर्तनलोलुपायै । प्रपन्नार्तिहरायै । नित्यायै ।
वेदसौधविहारिण्यै । श्रीरङ्गनाथमाणिक्यमञ्जरीमञ्जुभाषिण्यै ।
पद्मप्रियायै । पद्महस्तायै । वेदान्तद्वयबोधिन्यै । सुप्रसन्नायै ।
भगवत्यै । श्रीजनार्दनजीविकायै । (जनार्दनदीपिकायै)
सुगन्धावयवायै । चारुरङ्गमङ्गलदीपिकायै ।
ध्वजवज्राङ्कुशाब्जमालतिमृदुपादतलञ्छितायै ।
(कुशाब्जाङ्क) तारकाकारनखरायै । प्रवालमृदुलाङ्गुल्यै ।
कूर्मोपमेयपादोर्ध्वभागायै । शोभनपार्ष्णिकायै ।
वेदार्थभावतत्त्वज्ञायै नमः ॥ ६०॥

ॐ लोकाराध्याङ्घ्रिपङ्कजायै नमः । आनन्दबुद्बुदाकारसुगुल्फायै ।
परमांशकायै । (परमाणुकायै) अतुलप्रतिमाभास्वदङ्गुलीयकभूषितायै ।
(तेजःश्रियोज्ज्वलधृतपादाङ्गुलिसुभूषितायै)
मीनकेतनतूणीरचारुजङ्घाविराजितायै । कुब्जजानुद्वयाढ्यायै ।
(ककुद्वज्जानुयुग्माढ्यायै) स्वररम्भाभशक्तिकायै ।
(स्वर्णरम्भाभसक्थिकायै) विशालजघनायै । पीतसुश्रोण्यै ।
मणिमेखलायै । आनन्दसागरावर्तगम्भीराम्भोजनाभिकायै ।
भास्वद्वलित्रिकायै । चारुपूर्णलावण्यसंयुतायै ।
(चारुजगत्पूर्णमहोदर्यै) नवरोमावलिराज्यै ।
(नववल्लीरोमराज्यै) सुधाकुम्भस्तन्यै । कल्पमालानिभभुजायै ।
चन्द्रखण्डनखाञ्चितायै । प्रवालाङ्गुलिविन्यस्तमहारत्नाङ्गुलीयकायै ।
नवारुणप्रवालाभपाणिदेशसमञ्चितायै । कम्बुकण्ठ्यै नमः ॥ ८०॥

ॐ सुचिबुकायै नमः । बिम्बोष्ठ्यै । कुन्ददन्तयुजे ।
कारुण्यरसनिष्पन्दलोचनद्वयशालिन्यै । (नेत्रद्वयसुशोभितायै)
कमनीयप्रभाभास्वच्चाम्पेयनिभनासिकायै ।
(मुक्ताशुचिस्मिताचरुचाम्पेयनिभनासिकायै)
दर्पणाकारविपुलकपोलद्वितयाञ्चितायै ।
अनन्तार्कप्रकाशोद्यन्मणिताटङ्कशोभितायै ।
कोटिसूर्याग्निसङ्काशनानाभूषणभूषितायै । सुगन्धवदनायै ।
सुभ्रुवे । अर्धचन्द्रललाटिकायै । पूर्णचन्द्राननायै ।
नीलकुटिलालकशोभितायै । सौन्दर्यसीमाविलसत्कस्तूरीतिलकोज्ज्वलायै ।
धगद्धगायमानोद्यन्मणि(सीमन्त) भूषणराजितायै ।
जाज्वल्यमानसद्रत्नदिव्यचूडावतंसकायै ।
सूर्यचन्द्रादिकल्याणभूषणाञ्चितवेणिकायै ।
(सूर्यार्धचन्द्रविलसद्भूषणाञ्चितवेणिकायै)
अत्यर्कानलतेजोवन्मणिकञ्चुकधारिण्यै । (तेजोऽधिमणि)
सद्रत्नजालविद्योतविद्युत्पुञ्जाभशाटिकायै । (सद्रत्नाञ्चित)
नानामणिगणाकीर्णकाञ्चनाङ्गदभूषितायै नमः ॥ १००॥

(हेमाङ्गदसुभूषितायै)
ॐ कुङ्कुमागुरुकस्तूरिदिव्यचन्दनचर्चितायै
नमः । स्वोचितोज्ज्वलविद्योतविचित्रमणिहारिण्यै ।

परिभास्वद्रत्नपुञ्जदीप्तस्वर्णनिचोलिकायै ।
असङ्ख्येयसुखस्पर्शसर्वावयवभूषणायै । (सर्वातिशयभूषणायै)
मल्लिकापारिजातादिदिव्यपुष्पश्रियाञ्चितायै । श्रीरङ्गनिलयायै ।
पूज्यायै । दिव्यदेवीसेवितायै नमः ॥ १०८ (दिव्यदेशसुशोभितायै)

इति गोदाष्टोत्तरशतनामावलिः समाप्ता ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*godAShTottarashatanAmAvaliH*

pdf was typeset on June 22, 2019

Please send corrections to *sanskrit@cheerful.com*